## || श्री स्वामी समर्थ ||

---

## || श्री विद्या कवचम् ||

---

॥ ॐ गण गणपतये नमः ॥

॥ देव्युवाच ॥
देवदेव महादेव भक्तानां प्रीतिवर्धनम् ।
सूचितं यन्महादेव्याः कवचं कथयस्व मे ॥ १॥

॥ महादेव उवाच ॥
श्रुणु देवि प्रवक्ष्यामि कवचं देवदुर्लभम् ।
न प्रकाश्यं परं गुह्यं साधकाभीष्टसिद्धिदम् ॥ २॥
कवचस्य ऋषिर्देवि दक्षिणामूर्तिरव्ययः ।
छन्दः पङ्क्तिः समुद्दिष्टं देवी त्रिपुरसुन्दरी ॥ ३॥

धर्मार्थकाममोक्षाणां विनियोगस्तु साधने ।
वाग्भवः कामराजश्च शक्तिर्बीजं सुरेश्वरि ॥ ४॥
ऐं वाग्भवः पातु शीर्षे मां क्लीं कामराजस्तथा हृदि ।
सौः शक्तिबीजं सदा पातु नाभौ गुह्ये च पादयोः ॥ ५॥

ऐं श्रीं सौः वदने पातु बाला मां सर्वसिद्धये ।
ह्सौं हसकलह्रीं ह्सौः पातु भैरवी कण्ठदेशतः ॥ ६॥
सुन्दरी नाभिदेशे च शीर्षे कामकला सदा ।
भ्रूनासयोरन्तराले महात्रिपुरसुन्दरी ॥ ७॥

ललाटे सुभगा पातु भगा मां कण्ठदेशतः ।
भगोदया च हृदये उदरे भगसर्पिणी ॥ ८॥
भगमाला नाभिदेशे लिङ्गे पातु मनोभवा ।
गुह्ये पातु महादेवी राजराजेश्वरी शिवा ॥ ९॥

चैतन्यरूपिणी पातु पादयोर्जगदम्बिका ।
नारायणी सर्वगात्रे सर्वकार्ये शुभङ्करी ॥ १०॥
ब्रह्माणी पातु मां पूर्वे दक्षिणे वैष्णवी तथा ।
पश्चिमे पातु वाराही उत्तरे तु महेश्वरी ॥ ११॥

आग्नेयां पातु कौमारी महालक्ष्मीस्तु नैरृते ।
वायव्यां पातु चामुण्डा इन्द्राणी पातु ईशके ॥ १२॥
जले पातु महामाया पृथिव्यां सर्वमङ्गला ।
आकाशे पातु वरदा सर्वत्र भुवनेश्वरी ॥ १३॥

इदं तु कवचं देव्या देवानामपि दुर्लभम् ।

पठेत्प्रातः समुत्थाय शुचिः प्रयतमानसः ॥ १४॥
नाधयो व्याधयस्तस्य न भयं च क्वचिद्भवेत् ।
न च मारी भयं तस्य पातकानां भयं तथा ॥ १५॥

न दारिद्र्यवशं गच्छेत्तिष्ठेन्मृत्युवशे न च ।
गच्छेच्छिवपुरं देवि सत्यं सत्यं वदाम्यहम् ॥ १६॥
इदं कवचमज्ञात्वा श्रीविद्यां यो जपेत्सदा ।
स नाप्नोति फलं तस्य प्राप्नुयाच्छस्त्रघातनम् ॥ १७॥

॥ इति श्री विद्या कवचं सम्पूर्णम् ॥

---

॥ श्री गुरुदत्तात्रेयार्पणमस्तु ॥
|| श्री स्वामी समर्थार्पण मस्तु||

---